International Journal of Sanskrit Research 2017; 3(4): 168-171

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 168-171
© 2017 IJSR
www.anantaajournal.com
Received: 15-05-2017
Accepted: 16-06-2017

**Prasanta Das**
Research Scholar, Rsvp,
Tirupati, Andhra Pradesh, India

**A Vedanta**
Rsvp, Tirupati, Andhra Pradesh,
India

**Correspondence**
**Prasanta Das**
Research Scholar, Rsvp,
Tirupati, Andhra Pradesh, India

# सूतसंहितानुसारेणाद्वैते ज्ञानप्रतिबन्धकानां समीक्षणम्

**Prasanta Das and A Vedanta**

प्रस्तावना

इह खलु संसारे कीटपतङ्गस्थावरजङ्गमादारभ्य देवपर्यन्तैस्सर्वैः सुखमीप्सितम्। सुखं मे शाश्वतं भूयादिति वुद्ध्या प्रतिबन्धकं (दुःखादि) हातुं सुखं चोपलब्धुं सततमभिलषयति प्राणी। दुःखसन्तप्तानां जीवानां काम-राग-भय-लोभ-क्रोधादिदुःखहेतुनां दूरीकरणाय एव दर्शनशास्त्राणि विरचितानि। दर्शनशास्त्रं तु तत्त्वातत्त्वविवेचनाय प्रवर्तितम्। सर्वेऽपि दर्शनिकाः स्वमतानुसारं प्रतिबन्धकान् प्रतिबन्धकनिवृत्त्युपायभूतान् विचारान् प्रकटितवन्तः। यद्यपि प्रतिबन्धकनिवृत्त्युपायविषये दार्शनिकेषु विप्रतिपत्तयो दृश्यन्ते तथापि प्रतिबन्धकानामात्यन्तिगको विनाशः सर्वैरभिप्रेतः। दुःखरुपे सागरे निमग्नानां मनुष्याणां प्रतिबन्धकानां ज्ञानं नितराम् अपेक्षितं भवति। यतो हि प्रतिबन्धकमपसारणद्वारैव परमशान्तिमधिगच्छति। अतः सर्वेषामपि मनुष्याणां दर्शनशास्त्राध्यायनेषूपदिश्यमानां प्रतिबन्धकानां ज्ञानं परं प्रयोजनाय भविष्यति।

## स्कान्दपुराण-सूतसंहिता-ज्ञानप्रितबन्धकाश्च

अष्टादशपुराणेषु स्कन्दपुराणं त्रयोदशस्थानमलङ्करोति। स्कन्दपुराणमिदं ग्रन्थतो विस्तृतं भवति। एतच्च पुराणं भागद्वये विभक्तोऽस्ति यथा— क) केदारखण्डः ख) कुमारिकाखण्डश्चेति। प्रथमभागः सप्तखण्डेषु विभक्तोऽस्ति। द्वितीय भागस्तु षटसंहितासु विभक्ताऽस्ति। अत्रैव सूतसंहिता विद्यते। तत्र बहवो विचाराः दरीदृश्यन्ते तेषु ज्ञानप्रतिबन्धकनिरुपणमपि कृतमस्ति।

तथाहि सूतसंहितायां मुक्तिखण्डे ईश्वरः केशवं प्रति उपदिशति—

अथातः संप्रवक्ष्यामि ज्ञानानुत्पत्तिकारणम्।[1]
श्रृणु त्वं श्रद्धया युक्तः परिहाराय केशव।।
शिवद्रोहस्तु विज्ञानानुत्पत्तेमूलकारणम्।

[1] सूतसंहिता.९-३.६.१ -

शिवभक्तापराधश्च शिवज्ञानस्य दूषणम्
कामः क्रोधश्च लोभश्च मोहो दम्भस्तथैव च।
आलस्यमपि मात्सर्यं ज्ञानानुत्पत्तिकारणम्।।
धर्माधर्मेश्वरास्तित्वे संदेहश्च तथैव च।
तेषामभावबुद्धिश्च ज्ञानानुत्पत्तिकारणम्।।
मातृसंरक्षणाभावो मातृद्रोहश्च केशव।
मातृसंतापकारित्वं ज्ञानानुत्पत्तिकारणम्।।
वेदवेदान्तविद्वेषस्तदध्ययनवर्जनम्।
श्रोत्रियस्यापराधश्च ज्ञानानुत्पत्तिकारणम्।।[१]इत्यादिना।

अतः मोक्षप्राप्त्यर्थं प्रतिबन्धकं ज्ञात्वा तस्य निवारणं नितराम् अपेक्षितम् अस्ति।

उपदेशसाहस्र्यां गद्यभागे श्रीमच्छङ्करभगवत्पादैः ज्ञानप्रतिबन्धकानि शिष्यगतानि ज्ञात्वा गुरुणा आदौ तानि दुरीकर्तव्यनीति प्रतिपादितम् । तथाहि –

"शिष्यस्य ज्ञानाग्रहणं च लिङ्गैर्बुध्वा तदग्रहणहेतुनधर्मलौकिकप्रमाद नित्यानित्यवस्तुविवेकविषयासञ्जातदृढपूर्वश्रुतत्वलोकचिन्तावेक्षणजात्याद्यभिमानादींस्तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैरपनयेद अक्रोधादिभिश्च – यमैः ज्ञानाविरुद्धैश्च नियमैः"।
अमानित्वादिगण च ज्ञानोपायं सम्यग्ग्राह्येत् ।[2] इति ।

श्रीमच्छङ्करभगवत्पादाऽपि शारीरिकभाष्ये कतिचन् सूत्राणि प्रतिबन्धकत्वेन उल्लिखितानि।

"ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्।[3]"

अस्यायमर्थः – अप्रस्तुतप्रतिबन्धे, प्रस्तुतस्य श्रवणादिसाधनस्य कर्मविशेषेण प्रतिबन्धाभावे, ऐहिकमिहैव जन्मनि ज्ञानमुत्पद्यते। विचित्रविपाकत्वात्कर्मणाम्। बलवता केनचित्कर्मणा प्रतिबन्धे सति, जन्मान्तरेऽपि ज्ञानमुत्पद्यते कुतः? तद्दर्शनात्। 'गर्भस्थ एव वामदेवः प्रतिबुबुधे इति गर्भस्थस्य जन्मान्तरश्रवणादिना ज्ञानदर्शनात्।

अतः ज्ञानानुत्पत्तिकारणानि अन्विष्य दुरीकरणार्थं प्रयत्नः आवश्यकः इति प्रतिभाति। अतः द्वित्राः प्रतिबन्धकाः अत्र निरुपन्ते।

कामः, क्रोधश्च

अनिश्चयापि पापाचरणस्य कारणं किमिति सन्दिहानः अर्जुनः भगवन्तं पृच्छति।

अथ केन प्रयुक्तोऽयं पापं चरति पुरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।।

तदुत्तरया भगवान कथयति—
काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विध्येनमिह वैरिणाम्।।

अस्यार्थ भगवत्पादाः एवं वर्णयन्ति—
काम एष सर्वलोकशत्रुर्यान्निमित्ता सर्वानर्थप्राप्ति प्राणिनाम्। स एष कामः प्रतिहतः केनचित्क्रोधत्वेन परिणमते। अतः क्रोधोऽप्येष एव। रजोगुणसमुद्भवो रजश्च तद्गुणश्च रजोगुणः स समुद्भवो यस्य स कामो रजोगुणसमुद्भवः। रजोगुणस्य वा समुद्भवः। कामो हि उद्भूतो रजः प्रवर्तयन्पुरुषं प्रवर्तयति। तृष्णया ह्यहंकारित इति दुःखितानां रजः कार्ये सेवादौ प्रवृत्तानां प्रलापः श्रुयते। महाशनो महदशनमस्येति महाशनोऽत एव महापाप्मा।कामेन हि प्रेरितो जन्तुः पापं करोति। अतो विध्येनं काममिह संसारे वैरिणम्।।

**अश्रद्धा**

इयं ज्ञानप्रतिबन्धिका भवति ।
अतएव भगवता श्रीकृष्णेन उक्तम् –

[2] उपदेसाहस्री ४.५ –
[3] ब्रह्मसूत्रम्०३.४.५ -

"अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि"[4] ।।इति।

अयं श्लोकः भाष्यकारैः हि एवं व्याखातः
अश्रद्दधधानाः श्रद्धाविरहिता आत्मज्ञानस्य धर्मस्य अस्य स्वरुपे तत्फले च नास्तिकाः पापकारिणः आसुराणामुपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्ना असुतृपः पुरुषाः अप्राप्य मां परमेश्वरं निवर्तन्ते । निश्चयेन आवर्तन्ते ।
क्व ? मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारो मृत्युसंसारः तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गः तस्मिनेव वर्तन्ते इत्यर्थः ।
पुनरपि भगवता श्रद्धा स्तुता अश्रद्धा निन्दिता च ।तथाहि –

"श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्दियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति"[5] ।।
"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः"[6] ।।इति।

यतोहि श्रद्धा सुक्ष्मवस्त्ववधारणकारणं आम्नायते इति अवतार्य संक्षेपशारिरककारः सर्वज्ञात्मामुनिः एवं लिखति -

"श्रद्धत्स्व सोम्येति हि शास्ति शास्त्रं श्रद्धाधनत्व श्रुतिरस्ति चान्या ।
श्रद्धा तु यस्येत्यपरं च वाक्यमधीयते संशयकुत्सनाय" ।।
"अज्ञो विनश्यति पुमानतिमुग्धावादश्रद्धायोपहतवुद्धिरतोऽपि कष्टः ।
कष्टाच्च कष्टतर एव तु संशयात्मा दुःखी सदेती भगवानपि वासुदेवः"[7]
उपनिषदषुऽपि आचार्येन अश्रद्धा निन्दिता—

**अश्रद्धा-** यथाशास्त्रं कर्तव्यताज्ञानाभावः।

"तं ह कुमारसन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश सोऽमन्यन्त"।

अस्मिन् मन्त्रे श्रद्धा शब्दस्य आस्तिक्यबुद्धिः इति अर्थवर्णनं भाष्यकारैः कृतं वर्तते।
प्रकृते यथाशास्त्रं शास्त्रीयकर्मणः दक्षिणा दातव्या इति बुद्धिः श्रद्धा। अयं तु पिता जीर्णाः, अफलाः, गावः दक्षिणात्वे प्रतिषिद्धाः ददाति इति चिन्ता।
एतेन यथाशास्त्रं कर्तव्यताज्ञानं श्रद्धाशब्दवाच्यं भवति इति ज्ञायते। तद्राहित्यं 'अश्रद्धा' भवति।
इयं अश्रद्धा ज्ञानप्रतिबन्धकेति अयं मन्त्रः सूचयति

**अहंकारः** - अहंकारभावः अर्थात् अहंकर्ता, एतत् फलं मदीयमिति भावना । तथाचोक्तं भगवता षोडशाध्याये –

"अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" ।।

अहंकारमहंकरणमहंकारो, विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैः विशिष्टमात्मानमहमिति, मन्यते सोऽहंकारोऽविद्याख्याः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च। उपनिषद्षुऽपि अहङ्कारः नाम मिथ्याभिमानः इति प्रतिबन्धकं उल्लिखितमस्ति।।

**क्रोधः**

इष्टवस्तुनः अलाभे जायमानः अन्तकरण परिणामविशेष। तथाहि भगवान् कथयत- 'संगात्सञ्जायते कामः कामात्क्रोधोऽभिजायते' इति।

[4] भ९.३ – गी.
[5] भ४.३९ – गी.
[6] भ०४.४ – गी.
[7] संक्षेप १.२६७,६८ –

अत्र मया, स्कान्दपुराणान्तर्गत सूतसंहितायाः तृतीयकान्ड (मुक्तिकान्ड) षष्ठाध्यायोक्ति संवाद पुर्वकं च समीक्षणं क्रियते।

## ग्रन्थसूची

1. सूतसंहिता (स्कन्दपुरानान्तर्गत)।
2. भगवद्गीता शाङ्करभाष्यम्। गीताप्रेस, गोरखपुर-273005.
3. उपदेशसाहस्त्री, मूलग्रन्थः प्रकरणद्वादशी श्रीशङ्करभगवत्पादाचार्यविरचिता, Mahesh Research Institute, Shri dakshinamurti matha, D,49/9 mishra pokhara, Varanasi-221010.
4. ब्रह्मसूत्रशाङ्करभाष्यम्। Published by the metropolition & npublishing house, limited, colcutta 5.
5. संक्षेपशारीरकम्। श्री कैलास विद्याप्रकाशन, कैलास गेट,मुनी की रेती ऋषिकेश (उ.प्र), सन् – 1999.